त्रिपुष्करं स्वरान् देवी ब्रह्मादीनां त्रयं त्रयम् ॥”
इति सारदातिलकः ॥

अस्यार्थः । त्रिधामेति चन्द्रसूर्य्याग्निरूपा । द्विचत्वारिंशदिति भूतलिपिमन्त्रमयी । पञ्चाशदिति मातृकामयीत्यर्थः । सर्व्वगात्रेण सर्व्ववर्णेन गुम्फिता परस्परमिलिता सती मन्त्रमयं जगत् सूते प्रकाशयति इत्यर्थः । मूलाधारे सर्पवत् कुण्डलीभूता नाडी वर्त्तते तन्मध्यस्थायित्वादियं कुण्डली । सर्व्वविश्वेत्युभयोपादानात् शब्दार्थरूपोभयप्रतिपादिकेति सूचितम् । त्रिपुष्करमिति ज्येष्ठमध्यमकनिष्ठत्वेन तीर्थत्रयम् । स्वरानिति उदात्तानुदात्तसमाहारान् । इति तट्टीका ॥ * ॥ अपि च ।

“द्विचत्वारिंशता मूले गुम्फिता विश्वनायिका ।
सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः ॥
शक्तिं ततो ध्वनिस्तस्मान्नादस्तस्मान्निबोधिका ।
ततोऽर्द्धेन्दुस्ततो बिन्दुस्तस्मादासीत् परा ततः ॥”
इति सारदायामाचार्य्याः ॥

मूले मूलाधारे द्विचत्वारिंशता गुम्फिता विश्वनायिका कुण्डलिनी अनेन क्रमेण अकारादिसकारान्तां द्विचत्वारिंशदात्मिकां भूतलिपिमन्त्रात्मिकां वर्णमालिकां सूते इत्यन्वयः । क्रममाह शक्तिमिति सा कुण्डलिनी शक्तिं सूते ततः शक्तेर्ध्वनिरासीदिति योजना । ततो ध्वनेरित्यादि ज्ञेयम् । अयञ्च क्रमः सर्व्वाक्षरोत्पत्तौ ज्ञेयः । तत्र सत्त्वप्रविष्टा चिच्छक्तिशब्दवाच्या । पुनराकाशस्था सैव सत्त्वप्रविष्टा रजोऽनुविद्धा सती ध्वनिशब्दवाच्या । अक्षरावस्था सैव तमोऽनुविद्धा नादशब्दवाच्या । अव्यक्तावस्था सैव तमःप्राचुर्य्यान्निबोधिकाशब्दवाच्या । सैव तदुभयप्राचुर्य्यादर्द्धेन्दुशब्दवाच्या । उक्तञ्च पदार्थादर्शे ।

“इच्छाशक्तिबलोद्बुद्धो ज्ञानशक्तिप्रदीपकः ।
पुंरूपिणी च सा शक्तिः क्रियाख्या सृजति
प्रभुः ॥”

अस्यामेव बिन्दुः स्थानान्तरगतः पराद्याख्यो भवति ।

पश्यन्ती मध्यमा वाणी वैखरी शब्दजन्मभूः ।
तत्र परा मूले पश्यन्ती स्वाधिष्ठाने मध्यमा हृदये वैखरी मुखे । तदुक्तं पदार्थादर्शे ।

“सूक्ष्मा कुण्डलिनी मध्ये ज्योतिर्मात्रास्वरूपिणी ।
अश्रोत्रविषया तस्मादुद्गच्छन्त्यूर्द्ध्वगामिनी ॥
स्वयं प्रकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत् ।
सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी ॥
ततः संजल्पमात्रा स्यादविभक्तोर्द्ध्वगामिनी ।
सैवोरःकण्ठतालुस्था शिरोघ्राणरदस्थिता ॥
जिह्वामूलौष्ठनिर्धूतसर्व्ववर्णपरिग्रहा ।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥
इच्छाज्ञानक्रियात्मासौ तेजोरूपा गुणात्मिका ।
क्रमेणानेन सृजति कुण्डली वर्णमालिकाम् ॥
अकारादिसकारान्तां द्विचत्वारिंशदात्मिकाम् ।
पञ्चाशद्धारगुम्फिता पञ्चाशद्वर्णमालिकाम् ॥
सूते तदर्थतो भिन्नाः कला रुद्रादिकान्
क्रमात् ॥”
इति तट्टीका ॥

“अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालुका ॥”
इति शिक्षासूत्रम् ॥ * ॥

किञ्च ।

“यथा भवन्ति देहान्तरमी पञ्चाशदक्षराः ।
भेदा येन प्रकारेण तथा वक्ष्यामि तत्त्वतः ॥
समीरिताः समीरेण सुषुम्नारन्ध्रनिर्गताः ।
व्यक्तिं प्रयान्ति वदने कण्ठादिस्थानघट्टिताः ॥
उच्चैरुन्मार्गगो वायुरुदात्तं कुरुते स्वरम् ।
नीचैर्गतोऽनुदात्तञ्च स्वरितं तिर्य्यगागतः ॥
अर्द्धैकद्वित्रिसंख्याभिर्मात्राभिर्लिपयः क्रमात् ।
व्यञ्जनह्रस्वदीर्घप्लुतसंज्ञा भवन्ति ताः ॥
अकारेकारयोर्योगादेकारो वर्ण इष्यते ।
तस्यैवैकारयोगेन स्यादैकाराक्षरं तथा ॥
उकारयोगात्तस्यैव स्यादोकाराह्वयः स्वरः ।
तस्यैवौकारयोगेन स्यादौकाराह्वयः स्वरः ॥
सन्ध्यक्षराः स्युश्चत्वारो मन्त्राः सर्व्वार्थसाधकाः ।
ऌवर्णवर्णयोर्व्यक्तिर्न वै सम्यक् प्रदर्श्यते ॥
बिन्दुसर्गात्मनोर्व्यक्तिमनसोरणया वदेत् ।
कण्ठात्तु निःसरन् सर्गः प्रायोऽघात्मकतः-
परः ॥
नश्वरः सर्ग एव स्यात् सोच्छ्वासः प्राणकस्तु हः ।
स सर्गः क्षेपितः कण्ठे वायुना कादिमीरयेत् ॥
वर्गस्पर्शनमात्रेण कं स्वरस्पर्शनात्तु खम् ।
स्तोकगम्भीरसंस्पर्शात् गघौ ङञ्च बहिर्गतम् ॥
विसर्गस्तालुगः सोष्मा शं चवर्गञ्च यं तथा ।
ऋटुरेफषकाराश्च मूर्द्धगो दन्तगस्तथा ॥
ऌतवर्गलसानोष्ठात्तुपूपध्मानसंज्ञकान् ।
दन्तौष्ठाभ्यां वञ्च तत्तत्स्थानगोऽर्णान् समी-
रयेत् ॥”
इति प्रपञ्चसारे ३ पटलः ॥

सर्गो विसर्ग एव नश्वरो विकृतः सोच्छ्वासः सकाररूपः उच्छ्वासोऽन्तःप्रवेशशाली वायुः स्यादित्यन्वयः । एवं प्राणको बहिर्निर्गमनशाली वायुर्हः स्यात् स एव उच्छ्वासः सोच्छ्वासः । प्राणश्चासौ कौ वायुश्चेति प्राणकः । इति तट्टीका ॥ * ॥ अवर्णकवर्गहविसर्ज्जनीयाः कण्ठ्याः । १ । इवर्णचवर्गयशास्तालव्याः । २ । ऋवर्णटवर्गरषा मूर्द्धन्याः । ३ । ऌवर्णतवर्गलसा दन्त्याः । ४ । उवर्णपवर्गोपध्मानीया ओष्ठ्याः । ५ । वो दन्त्यौष्ठ्यः । ६ । ए ऐ कण्ठ्यतालव्यौ । ७ । ओ औ कण्ठ्यौष्ठ्यौ । ८ । इति शिक्षासूत्रम् ॥ * ॥ अपि च ।

“यद्गुह्यं सर्व्वतन्त्रेषु वर्णोच्चारविधिं शिवे ! ।
तव स्नेहान्महेशानि ! तदद्य कथयामि ते ॥
पञ्चाशन्मातृकावर्णोच्चारणं गुरुतोऽभ्यसेत् ।
अ कु चु टु तु पु यु शु अष्टौ वर्गाः प्रकीर्त्तिताः ॥
अ कु हाः कण्ठतो ज्ञेयाः१ स्तालुस्थयशाः -
स्मृताः । २ ।
ऋ टु रषास्तु मूर्द्धन्याः ३ दन्त्या ऌ तु ल सा
मताः ॥ ४ ॥
उपवश्चौष्ठसंभूताः ५ स्थानानि कथितानि ते ।
विशेषं कथयाम्यद्य प्रोच्चार्य्यः कण्ठतः स्वराः ॥
ऋद्वयं जिह्वया मूर्द्ध्ना ऌद्वयं जिह्वदन्तजम् ।
मुखस्थानाद्धलो वाच्याः चकारः कराटघातजः ॥
व्यञ्जनद्वयसंयोगे भवेत् पूर्व्वस्वरो गुरुः ।
पदान्तादिमवर्णस्य संयोगेषु श्रुतिर्द्वयोः ॥
अपदान्तादिसंयोगे य्वोरन्यत्र तथेष्यते ।
य्वोः श्रुतिस्तु तिरोभूय स्वरवत् श्रुततां व्रजेत् ॥
शिवा वीजे शकारस्य छश्रुतिः परमेश्वरि ! ।
छश्रुतिश्च रादिस्थेणौ तथादिस्थे तु चश्रुतिः ॥
सहस इत्यादौ नमस्तस्यै व्यास्या इत्यादौ च ।
रेफादिके तदन्ते वा हकारे समवाच्यता ॥
वर्हः ह्रद इत्यादौ ।
किन्तु वैजात्यमाश्रित्य स्फुटं नात्रास्य वाच्यता ॥
चु तूर्य्यध्वनिमाप्नोति यादिस्थे परमेश्वरि ! ।
वाह्य इत्यादौ ।
पु चतुर्थध्वनिं याति वादिस्थे तु विशेषतः ॥
आह्वानमित्यादौ ।
लादिस्थेऽप्यथ नादिस्थे वैजात्यं स्वल्पवाच्यता ।
प्रह्लाद अह्नाय इत्यादौ ।
मादिस्थे भे च मस्यापि नासिकामूलवाच्यता ॥
ङ ञ ण न मा बिन्दुर्नासिकामूलजाः स्मृताः ।
यकारस्तु तृतीयत्वं पदादौ सर्व्वदा व्रजेत् ॥
केयूरादावपि तथा अन्यत्र कण्ठमात्रगः ।
नादिस्थशसयोश्छत्वं स्वरयोगान्तवर्गके ॥
प्रश्नः स्नान इत्यादौ ।
वर्णोत्तरेषु डढयोर्व्वक्रजिह्वादिवाच्यता ।
वैजात्यमपि तत्रास्ति गुरोरेव समभ्यसेत् ।
आदिरेफस्तु संप्रोक्तो हृशिरन्यो व्रजेद्धताम् ।
एवं ज्ञात्वा महेशानि ! पठेत् स्तोत्रं जपेन्मनुम् ॥
कवचञ्च महेशानि नान्यथा फलमाप्नुयात् ॥”
इति प्रपञ्चसारे ३ पटलः ॥ * ॥

अपि च ।

“ह्रस्वः स्वरेषु पूर्व्वोक्तः परो दीर्घः क्रमादिमे ।
शिवशक्तिमयास्ते स्युर्बिन्दुसर्गावसानकाः ॥
बिन्दुः पुमान् रविः प्रोक्तः सर्गः शक्तिर्निशा-
करः ।
स्वराणां मध्यगं यत्तु तच्चतुष्कं नपुंसकम् ॥
विना स्वरैस्तु नान्येषां जायते व्यक्तिरञ्जसा ।
शिवशक्तिमयान् प्राहुस्तस्माद्वर्णान् मनीषिणः ॥
कारणात् पञ्चभूतानामुद्भूता मातृका यतः ।
ततो भूतात्मका वर्णाः पञ्च पञ्च विभागतः ॥
वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात् ।
पञ्च ह्रस्वाः पञ्च दीर्घाः बिन्द्वन्ताः सन्धिसम्भवाः ।
पञ्चशः कादयः य च ल स हान्ताः समी-
रिताः ॥”
इति सारदा ॥ * ॥

अक्षरस्थितिकारणं यथा,—
“शाखासाक्षिकेऽपि समये भ्रान्तिः संजायते
यतः ।